# अभ्यासप्रश्नपत्रम् (मार्च-2024-25)

# विषय : संस्कृतम्

**कक्षा : दशमी** **कोड न. 049**

**SET : A**

रोल नं० | | | | | | | | | | |

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

---

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 10 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 21 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः ‘क’

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

एकः काकः मुखे रोटिकाखण्डं गृहीत्वा वृक्षे उपविष्टः आसीत्। एकः जम्बुकः काकं दृष्ट्वा अवदत्- भो मित्र! खगेषु भवान् मधुरगायकः। कृपया गायतु इति। काकः किञ्चिद् विचार्य रोटिकाखण्डं पादयोः अधः स्थापयित्वा अवदत्-“रे नाहं पूर्ववत् मूर्खः।” लज्जितः जम्बुकः ततः पलायितः।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) काकः कुत्र उपविष्टः आसीत्?
(ii) कः लज्जितः अभवत्?
(iii) “रे नाहं पूर्ववत् मूर्खः” इति कः कथयति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) जम्बुकः काकं दृष्ट्वा किम् अवदत् ?
(ii) काकः मुखे किं गृहीत्वा वृक्षे उपविष्टः आसीत्?
(iii) कः ततः पलायितः?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) ‘अधः’ इत्यस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?
(क) आन्तरिकः (ख) बाह्य
(ग) उपरि (घ) विचार्य

(ii) ‘गृहीत्वा’ अत्र कः प्रत्ययः?
(क) तुमुन् (ख) शतृ
(ग) क्त्वा (घ) शानच्

(iii) ‘मधुरः गायकः’ अत्र विशेषणपदं किम् ?
(क) गायकः (ख) मधुरः
(ग) मधुर (घ) मधुरगायकः

(iv) ‘अवदत्’ इत्यस्मिन् पदे कः लकारः?
(क) लट्लकारः (ख) लोट्लकारः
(ग) लङ्लकारः (घ) लृट्लकारः

# खण्डः 'ख'

# रचनात्मक-कार्यम्

1. (क) विद्यालये प्रवेशार्थं निवेदनपत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयन्तु – 4

सेवायाम्

प्रधानाचार्यः महोदयः,
रा. व. मा. विद्यालयः,
क ख ग

श्रीमन्तः,


सविनयं (i) .............. इदं यद् अहम् अस्मिन् वर्षे भिवानीनगरस्य राजकीयविद्यालयतः नवमी कक्षायां प्रथमश्रेण्यां सफलतां (ii) ............ अस्मि। मम पितुः स्थानान्तरणं जातम्। अहं (iii) ..................... यद् भवतः विद्यालयः हरियाणाप्रान्ते अति (iv) ................... विद्यालयः अस्ति। अहम् अत्र पठितुम् इच्छामि। आशासे भवान् मम प्रार्थनां स्वीकृत्य मामनुग्रहीष्यति।

भवदीयः
दिनेशः

**मञ्जूषा**

| जानामि, प्राप्तवान् , प्रतिष्ठितः, निवेदनम् |
|---|

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 4



(i) इदं वर्षा ................ दृश्यम् अस्ति।

(ii) गगनं ................. शोभते।

(iii) बालिका शिरसी .............. धारयतः।

(iv) द्वौ बालकौ जले ............. तारयतः।

**मञ्जूषा**

| |
|---|
| मेघाच्छन्नं, ऋतोः, आतपत्रं , कर्गदनौकां |

## खण्डः 'ग'

## पठित-अवबोधनम्

3. निम्नलिखितं गद्याशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते। प्रकृतेः समक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्।

**अथवा**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्ति उद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

**अथवा**

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।
करणीयं बहिरन्तर्जगति तु बहु शुद्धिकरणम्।
शुचि पर्यावरणम्।।

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

(ख) न कुर्यादहितं कर्म परेभ्यः कदापि च।

(ग) अत्यादरः शङ्कनीयः।

(घ) आचारः प्रथमो धर्मः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

सेवितव्यो महावृक्षः, फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते॥

**अन्वयः :-**

फलच्छायासमन्वितः (1) ......... सेवितव्यः (2) ............. यदि (3) .......... नास्ति (4) ......... केन निवार्यते।

**मञ्जूषा**

| |
|---|
| फलं , महावृक्षः , छाया , दैवात् |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

एकः सिंहः सुखेन विश्राम्यते। तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्माद् वृक्षाद् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षस्योपरि आरोहति।

**प्रश्नाः :-**

(क) सिंहस्य पुच्छं कः धुनोति ?

(ख) वृक्षं कः आरूढः ?

(ग) अपरः वानरः सिंहस्य किम् आकृष्य आरोहति ?

(घ) 'वृक्षस्योपरि' अस्य सन्धिविच्छेदः कः ?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

सेवितव्यो महावृक्षः फलच्छाया समन्वितः ।

यदि दैवात् फलं नास्ति छाया केन निवार्यते ।।

**प्रश्नाः :-**

(क) कीदृशः वृक्षः सेवितव्यः ?

(ख) दैवात् किम् नास्ति ?

(ग) 'नास्ति' अत्र कः सन्धिच्छेदः ?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) पुत्रं द्रष्टुं सः प्रस्थितः। (कम् / काम्)

(ख) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः। (कदा / कस्य)

(ग) न्यायाधीशः बंकिमचन्द्रः आसीत्। (कः / कम्)

(घ) सः भारवेदनया क्रन्दति स्म। (कम् / कया)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं कण्ठस्थं श्लोकं संस्कृतभाषया लिखत। 1x4=4

# खण्डः – 'घ'

# अनुप्रयुक्त-व्याकरणम्

10. (क) स्वरसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्वन्द्वसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) सम्प्रदानकारकस्य अथवा अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टानि शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'बालक' शब्दस्य चतुर्थी-एकवचने।

(ii) 'राम' शब्दस्य पञ्चमी-द्विवचने।

(iii) 'देव' शब्दस्य सप्तमी-बहुवचने।

(iv) 'नदी' शब्दस्य प्रथमा-बहुवचने।

(v) 'लता' शब्दस्य द्वितीया-एकवचने।

(vi) 'किम्' (पु.) शब्दस्य षष्ठी-बहुवचने।

12. यथानिर्दिष्टानि धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'अस्' धातोः लट्लकारस्य, प्र.पु. द्विवचने।

(ii) 'हन्' धातोः लृट्लकारस्य, उ.पु. एकवचने।

(iii) 'गम्' (गच्छ्) धातोः लट्लकारस्य, म.पु. बहुवचने।

(iv) 'पठ्' धातोः विधिलिङ्लकारस्य, म.पु. एकवचने।

(v) 'दृश्' (पश्य्) धातोः लट्लकारस्य, उ.पु. एकवचने।

(vi) 'पा' (पिब्) धातोः लृट्लकारस्य, प्र. पु. एकवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

(i) पिता ................ कुप्यति। (पुत्रम् / पुत्राय)

(ii) माता .............. सह गच्छति। (पुत्रात् / पुत्रेण)

(iii) ............... विना न जीवनम् । (जलस्य / जलम् )

(iv) सः .............. काणः। (नेत्राभ्याम् / नेत्रेण)

(v) ........... परितः वृक्षाः सन्ति। (ग्रामात् / ग्रामम् )

14. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) पर्यावरणस्य संरक्षरणम् ............... प्रकृतेः आराधना। (एव / च))

(ii) ................ सत्यं वद। (सदा / कदा)

(iii) ........... अनृतं न वदेत्। (कदापि / सदा)

15. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) आगत्य (ii) उपेत्य (iii) अनुगृहीतः

# खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

(क) 'पदातिः+ एव' अत्र किं सन्धियुक्तपदम्?

(i) पदातिएव (ii) पदातेरिव

(iii) पदातिरेव (iv) पदातरिव

(ख) 'प्रकृतिरेव' इत्यस्मिन् पदे कः सन्धिविच्छेदः?

(i) प्राकृति + एव (ii) प्रकृतिः+एव

(iii) प्रकृति+रेव (iv) प्र+कृति

(ग) 'महाराष्ट्रे' इत्यस्य पदस्य विग्रहपदं किम्?

(i) महत् च तत् राष्ट्रं तस्मिन् (ii) महान् राष्ट्रः

(iii) महान राष्ट्र (iv) महान च सः राष्ट्रम्

(घ) 'पञ्चवटी' इत्यस्मिन् पदे कः समासः ?

(i) द्वन्द्वः (ii) अव्ययीभावः

(iii) तत्पुरुषः (iv) द्विगुः

(ङ) 'सार्थकम्' इत्यस्य पदस्य विलोमशब्दः कः ?

(i) निर्धनम् (ii) निर्बलः

(iii) निर्लज्जः (iv) निरर्थकम्

(च) 'कृतज्ञता' इत्यस्य पदस्य विलोमपदं किम् ?

(i) कृपणता (ii) कातरता

(iii) कृतघ्नता (iv) कृपण

(छ) 'तनुः' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) मनः (ii) वनम्

(iii) धनम् (iv) शरीरम्

(ज) 'सविता' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) भास्करः (ii) पावकः

(iii) शशि (iv) चन्द्रः

(झ) 'त्यज् + क्त्वा' इत्यस्य संयोगे किं रूपम् ?

(i) त्यजित्वा (ii) त्यज्य

(iii) त्यक्त्वा (iv) त्याज्य

(ञ) 'धैर्यवान्' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) मतुप् (ii) क्त

(iii) क्त्वा (iv) तुमुन्

(ट) 'नवतिः' इत्यस्मिन् पदे का संख्या?

(i) 19 (ii) 29

(iii) 90 (iv) 99

(ठ) '27' इत्यस्य पदस्य किं संख्यावाचीपदम्?

(i) पञ्चाशत् (ii) सप्तदशः

(iii) सप्तविंशतिः (iv) सप्तादश

(ड) 'महत् विद्याधनम्' अत्र किं विशेष्यपदम् ?

(i) महत् (ii) विद्याधनम्

(iii) विद्या (iv) धनम्


(ढ) 'सर्वैः उपायैः' अत्र किं विशेषणपदम् ?

(i) सर्वै (ii) सर्वैः

(iii) उपायैः (iv) सर्वउपायैः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

रामः प्रातः ............ वादने उत्तिष्ठति।




(i) पञ्च (ii) सपादपञ्च

(iii) सप्त (iv) सार्धपञ्च

(त) मयंकः प्रातः ………… भ्रमणाय गच्छति।




(i) चतुर्वादने (ii) सपादचतुर्वादने

(iii) सार्धचतुर्वादने (iv) पादोनचतुर्वादने

(थ) 'चतुर्विंशतिः' इत्यस्मिन् पदे का संख्या?

(i) 14 (ii) 24

(iii) 44 (iv) 54

# अभ्यासप्रश्नपत्रम् (मार्च-2024-25)

## अङ्कयोजना उत्तरसङ्केताश्च

## कक्षा – दशमी

## संस्कृतम्

**समयः - होरात्रयम्** **सम्पूर्णाङ्काः - 80**

**अवधातव्यम् –**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निर्देशात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्तव्यः। यथा पठितगद्यांशे त्रयाणां प्रश्नानाम् उत्तरलेखनम् अभीष्टं परं छात्रः यदि चतुर्णां प्रश्नानाम् उत्तराणि लिखति तर्हि तत्र केवलं प्रथमत्रयाणां प्रश्नानां न अपितु यानि उत्तराणि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।

| | खण्डः 'क' अपठितावबोधनम् | 10 अङ्काः |
|---|---|---|
| 1. | **अपठितगद्यांशाधारित-उत्तराणि :-** | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. वृक्षे<br>ii. जम्बुकः<br>iii. काकः | 2×1=2 |
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. जम्बुकः काकं दृष्ट्वा अवदत्, "भो मित्र! खगेषु भवान् मधुरगायकः। कृपया गायतु" इति।<br>ii. काकः मुखे रोटिकाखण्डं गृहीत्वा वृक्षे उपविष्टः आसीत्।<br>iii. जम्बुकः ततः पलायितः। | 2×2=4 |
| | **(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**<br>चतुरकाकः<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः। | 1 |

| | | |
|---|---|---|
| | **(द) यथानिर्देशम् उत्तरत-** **( केवलं प्रश्नत्रयम् )**<br>i. (ग) उपरि<br>ii. (ग) क्त्वा<br>iii. (ख) गायकः<br>iv. (घ) लङ् लकारः | 3×1=3 |
| | **खण्ड 'ख' रचनात्मक-कार्यम्** | **08 अङ्काः** |
| **2.** | **(क) पत्रलेखनम्**<br>**सेवायाम,**<br>**प्रधानाचार्यः महोदयः,**<br>रा.व.मा. विद्यालयः,<br>क ख ग<br>श्रीमन्तः,<br>सविनयं (i) <u>निवेदनम्</u> इदं यद् अहम् अस्मिन् वर्षे भिवानी नगरस्य राजकीयविद्यालयतः नवमी कक्षायाः प्रथमश्रेण्यां सफलतां (ii) <u>प्राप्तवान्</u> अस्मि। मम पितुः स्थानान्तरणं जातम्। अहम् (iii) <u>जानामि</u> यद् भवतः विद्यालयः हरियाणाप्रान्ते अति (iv) <u>प्रतिष्ठितः</u> अस्ति। अहम् अत्र पठितुम् इच्छामि। आशासे भवान् मम प्रार्थनां स्वीकृत्य मामनुग्रहीष्यति।<br>भवदीयः,<br>महेशः।<br><br>**(ख) चित्रं दृष्ट्वा रिक्तस्थानपूर्तिः**<br>(i) इदं वर्षा <u>ऋतोः</u> दृश्यम् अस्ति।<br>(ii) गगनं <u>मेघाच्छन्नं</u> शोभते।<br>(iii) बालिका शिरसि <u>आतपत्रं</u> धारयतः।<br>(iv) द्वौ बालकौ जले <u>कर्गदनौकां</u> तारयतः। | 4×1=4<br><br>4×1=4 |
| | **खण्ड 'ग' पठित-अवबोधनम्** | **24 अङ्काः** |
| **3.** | **गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br>प्रस्तुतगद्यांशः पाठ–7 "भूकम्पविभीषिका" इति पाठाद् उद्धृतः।<br>**अथवा**<br>प्रस्तुतगद्यांशः पाठ-5 **"बुद्धिर्बलवती सदा"** इति पाठाद् उद्धृतः।<br>कस्यापि एकस्य गद्यांशस्य हिंदीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | 1×4=4 |
| **4.** | **श्लोकं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br>प्रस्तुतश्लोकः पाठ-6 **"सुभाषितानि"** इति पाठाद् उद्धृतः। | 1×4=4 |

| | | |
|---|---|---|
| | **अथवा**<br><br>प्रस्तुतश्लोकः पाठ-1 **“शुचिपर्यावरणम्”** इति पाठाद् उद्धृतः।<br>कस्यापि एकस्य श्लोकस्य हिंदीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | |
| **5.** | **सूक्त्योः भावार्थलेखनम् :-**<br><br>प्रदत्तसूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेखनेन पूर्णाः अङ्काः 2+2=4 प्रदेयाः।<br><br>**अथवा**<br><br>**अन्वयस्य रिक्तस्थानपूर्तिः :- (उत्तराणि)**<br><br>1) महावृक्षः<br>2) दैवात्<br>3) फलं<br>4) छाया | 2×2=4<br><br>**अथवा**<br><br>4×1=4 |
| **6.** | **पठितगद्यांशाधारित-उत्तराणि :-**<br>(क) सिंहस्य पुच्छं <u>वानरः</u> धुनोति।<br>(ख) वृक्षं <u>वानरः</u> आरुढः।<br>(ग) अपरः वानरः सिंहस्य <u>कर्णम्</u> आकृष्य आरोहति ।<br>(घ) वृक्षस्य + उपरि। | 3×1=3 |
| **7.** | **पठितश्लोकाधारित-उत्तराणि :-**<br>(क) फलच्छाया समन्वितः महावृक्षः सेवितव्यः।<br>(ख) दैवात् फलं नास्ति ।<br>(ग) न + अस्ति । | 2×1=2 |
| **8.** | **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्)**<br>**उत्तराणि :-**<br>(क) <u>कं</u> द्रष्टुं सः प्रस्थितः?<br>(ख) <u>कस्य</u> पादध्वनिना अतिथिः प्रबुद्धः?<br>(ग) न्यायाधीशः <u>कः</u> आसीत्?<br>(घ) सः <u>कया</u> क्रन्दति स्म? | 3×1=3 |
| **9.** | प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी भाग -2' पुस्तकात् संस्कृतभाषया एकं शुद्धं श्लोकं लेखने 4 अङ्काः प्रदेयाः। त्रुटिपूर्णवर्तन्यै अङ्काः कर्तनीयाः। | 1x4=4 |

| | खण्डः 'घ' अनुप्रयुक्त-व्याकरणम् | 22 अङ्काः |
|---|---|---|
| **10.** | (क) स्वरसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ ।<br>(ख) द्वन्द्वसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ ।<br>(घ) सम्प्रदानकारकस्य अथवा अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ । | 1×2=2<br>1×2=2<br>1×2=2 |
| **11.** | **यथानिर्दिष्टानि शब्दरूपाणि - (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>i. बालकाय<br>ii. रामाभ्याम्<br>iii. देवेषु<br>iv. नद्यः<br>v. लताम्<br>vi. केषाम् | 4×1=4 |
| **12.** | **यथानिर्दिष्टानि धातुरूपाणि - (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>i. स्तः<br>ii. हनिष्यामि<br>iii. गच्छथ<br>iv. पठेयम्<br>v. पश्यामि<br>vi. पास्यति | 4×1=4 |
| **13.** | **उचितविभक्तिप्रयोगं कुरुत। (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>i. पुत्राय<br>ii. पुत्रेण<br>iii. जलम्<br>iv. नेत्रेण<br>v. ग्रामम् | 4×1=4 |

| | | |
|---|---|---|
| **14.** | **अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्)**<br>**उत्तराणि :-**<br>i. एव<br>ii. सदा<br>iii. कदापि | 2×1=2 |
| **15.** | **उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्)**<br>**उत्तराणि :-**<br>i. आ<br>ii. उप<br>iii. अनु | 2×1=2 |
| **खण्ड – 'ङ' पाठाधारिताः बहुविकल्पीयाः प्रश्नाः** | | **17 अङ्काः** |
| **16.** | **प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत –**<br>**उत्तराणि :-**<br>(क) (iii) पदातिरेव<br>(ख) (ii) प्रकृतिः+एव<br>(ग) (i) महत् च तत् राष्ट्रं तस्मिन्<br>(घ) (iv) द्विगुः<br>(ङ) (iv) निरर्थकम्<br>(च) (iii) कृतघ्नता<br>(छ) (iv) शरीरम्<br>(ज) (i) भास्करः<br>(झ) (iii) त्यक्त्वा<br>(ञ) (i) मतुप्<br>(ट) (iii) 90<br>(ठ) (iii) सप्तविंशतिः<br>(ड) (ii) विद्याधनम्<br>(ढ) (ii) सर्वैः<br>(ण) (i) पञ्च<br>(त) (iii) सार्धचतुर्वादने<br>(थ) (ii) 24 | 17×1=17 |
| | | |